# आदर्शप्रश्नपत्रम् 1

## संस्कृतम्

### दशमी-कक्षा

| | |
|---|---|
| **अवधिः होरात्रयम्** | **पूर्णाङ्काः 100** |
| **समय - तीन घण्टे** | **पूरे अङ्क-100** |
| **Time - 3 hours** | **Total Marks 100** |
| Section A: Reading Comprehension<br>खण्डः 'क' अपठितांश-अवबोधनम् | 15 अङ्काः |
| Section B: Writing skills<br>खण्डः 'ख' रचनात्मक-कार्य | 20 अङ्काः |
| Section C: Applied Grammar<br>खण्डः 'ग' अनुप्रयुक्तव्याकरणम् | 30 अङ्काः |
| Section D: Text books<br>खण्डः 'घ' पठित-अवबोधनम् | 35 अङ्काः |

**निर्देशाः**

**Instructions**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
   इस प्रश्नपत्र में चार खण्ड हैं।
   The answers paper has four sections.

2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
   प्रत्येक खण्ड के उत्तर पृथक् दी गई उत्तरपुस्तिका में ही लिखने हैं।
   The questions have to be written on a separate answersheet.

3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
   प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।
   The answer to each section must be written at one place.

4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
   प्रश्नपत्र पर उत्तर न लिखें।
   Don't write answers in the Question paper.

5. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
   प्रश्नपत्र के अनुसार प्रश्नसंख्या अवश्य ही लिखनी होगी।
   Please write the Question No. according to the Question paper.

**आदर्शप्रश्नपत्रम् 1**
**संस्कृतम्**

**समयः होरात्रयम्** **दशमी–कक्षा** **पूर्णाङ्काः– 100**

**Times 3 hours**

## खण्डः 'क'
## खण्ड क
## Section-A

1. **अधोलिखित–अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत**
**निम्नलिखित अनुच्छेद को पढ़कर उस पर आधारित प्रश्नों के उत्तर उत्तरपुस्तिका में लिखिए।**
**Read the following passage and answer the questions in the given answer sheet.**
मुखे रोटिकाखण्डं गृहीत्वा एकः काकः वृक्षे उपविष्टः आसीत्। एकः श्रृगालः तम् दृष्ट्वा अवदत्–भो मित्र! खगेषु भवान् एव सुन्दरः, चतुरः, मधुरगायकः च। कृपया गायतु इति। रोटिकाखण्डं पादयोः अधः स्थापयित्वा काकः अवदत्–रे नाहं पूर्ववत् मूर्खः। गताः ते दिवसाः। तर्हि गच्छतु इति लज्जितः श्रृगालः शिरः नत्वा ततः पलायितः।

**I. एकपदेन उत्तरत** ½x4=2
**एक पद में उत्तर लिखिए**
**Answer in one word only**
(i) श्रृगालः कं प्रशंसति स्म?
(ii) काकस्य उत्तरं श्रुत्वा कः लज्जितः अभवत्?
(iii) काकस्य मुखे किमासीत्?
(iv) काकः कुत्र उपविष्टः आसीत्?

**II पूर्णवाक्येन उत्तरत** 2x1=2
**पूर्ण वाक्य में उत्तर दीजिए**
**Answer in a complete sentence**
काकः रोटिकाखण्डं कुत्र अस्थापयत्?

**III यथानिर्देशम् उत्तरत** ½x2=1
**निर्देशानुसार उत्तर दें**
**Do as directed**
(i) 'मूर्खः' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम्?
(ii) गताः ते दिवसाः इति काकः कम् अकथयत्?

2. **अधोलिखित–अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत**
**निम्नलिखित अनुच्छेद को पढ़कर उस पर आधारित प्रश्नों के उत्तर उत्तरपुस्तिका में लिखिए।**
**Read the following passage and answer the questions in the given answer sheet.**
दीपावलिः प्राचीनतमं पर्व। अस्मिन् दिने सर्वाधिकम् आकर्षकं मनोरज्जनं भवति स्फोटकानाम् आस्फोटनम्। विचित्राणि वर्णयुक्तानि स्फोटकानि आकाशे भूमौ च विविधरूपाणि दर्शयन्ति। जनाः तानि दृष्ट्वा तुष्यन्ति। परन्तु अति सर्वत्र वर्जयेत्।

रात्रौ आस्फोटकानां शब्द: कर्णौ बधिरीकरोति वायुमण्डलं च दूषयति। पूर्वं तु जनसंख्या सीमिता आसीत्। वृक्षा: वायुं शुद्धं कुर्वन्ति स्म। इदानीम् जनसंख्या प्रवृद्धा, वृक्षसंख्या क्षीणा। विस्फोटकेभ्य: निर्गत: धूम: रुग्णान् पीडयति, नवजातशिशुभ्य: हानिकर: सिध्यति। दीपावलि-समये शरदि आकाश: निर्मल: भवति। सर्वत्र पवित्रता विराजते। अत: वयम् आनन्देन दीपावलिं मानयेम, वसुन्धरां भूषितां कुर्याम न तु दूषिताम्। सर्वेषां जीवनं सुखमयं भवेत्। किं तेन उत्सवेन य: कस्मैचित् अपि कष्टकर: भवेत् ? मा कश्चिद् दु:खभाग् भवेत् इति अस्माकम् आदर्श:।

**I. एकपदेन उत्तरत** 1/2x4=2

**एक पद में उत्तर लिखिए**

**Write answer in one word only**

(I) केषाम् आस्फोटनम् सर्वेभ्य: आकर्षकम् मनोरञ्जकम् च?

(II) दीपावलि: कस्मिन् ऋतौ भवति ?

(III) के वायुं शुद्धं कुर्वन्ति ?

(IV) सर्वेषां जीवनं कीदृशं भवेत् ?

**II. पूर्णवाक्येन उत्तरत** 2x2=4

**पूर्णवाक्य में उत्तर दीजिए**

**Answer in a complete sentence**

(I) अस्माकं क: आदर्श: ?

(II) स्फोटकानां धूम: कान् पीडयति ?

**III. यथानिर्देशम् उत्तरत** 1/2x4=2

**निर्देशानुसार उत्तर दीजिए**

**Do as directed**

(I) 'प्रवृद्धा' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(II) 'सर्वत्र पवित्रता विराजते' अत्र किं अव्ययपदम् ?

(III) 'पर्व' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम् ?

(IV) 'लाभकर:' इत्यस्य किं विलोमपदं प्रयुक्तम् ?

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** 2

**इस अनुच्छेद का समुचित शीर्षक दीजिए।**

**Write an appropriate title for this passage.**

## खण्डः 'ख'
## खण्ड–ख
## Section - B
## रचनात्मकलेखनम् 20
## Writing Skills

3. **भवतः नाम सक्षमः छात्रावासे च भवान् वसति। अजन्ता-अलोरा-गुहा दर्शनार्थं शैक्षिकयात्रायै गन्तुम् इच्छति। धनप्रेषणार्थं पितरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः उचितशब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।**

**आपका नाम सक्षम है और आप छात्रावास में रहते हैं। शैक्षिक यात्रा के लिए आप अजन्ता-एलोरा की गुफाओं को देखने के लिये जाना चाहते हैं। धन भेजने के लिए पिता को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए उचितशब्दों के द्वारा पूर्णकर पत्र को पुनः उत्तरपुस्तिका में लिखिए।**

**You are Saksham and stay in a hostel. You want to visit Ajanta Allora in an educational trip. Fill in the blanks in the following letter written to your father for sending money. Select appropriate words from the given box.**

5

22, रङ्गनाथन् छात्रावासः
______
(1)

22.9.2003

परमादरणीयाः ______ !
2
सादरं प्रणमामि।

सविनयं----3----यत् मम त्रैमासिकी परीक्षा समाप्तिं गता। मम----4-----शोभनानि अभवन्। अस्मिन्-----5-----अहं गृहं न आगमिष्यामि, यतः विद्यालयेन एकस्याः----6--------प्रबन्धः कृतः। एषा अजन्ता एलोरागुहानां दर्शनाय आयोजिता अस्ति। यात्राव्ययार्थं----7-----रूप्यकाणि प्रेषयन्तु भवन्तः।

शेषं सर्वं कुशलम्। मम------8-------अग्रजाय च सादरं प्रणामाः।

भवदीयः______
9
सक्षमः।

मञ्जूषा

| |
|---|
| चेन्नईनगरम्, निवेदयामि, प्रियपुत्रः, |
| शैक्षिकयात्रायाः, पञ्चशतम्, |
| कालिकातातः, शरदवकाशे, |
| जनन्यै, उत्तरपत्राणि, पितृमहाभागाः |

डॉ० राजगोपालाचार्यः
330 अनन्तपुरम्
______
10

4. **एकः छात्रः रात्रौ शिरसः अधः पुस्तकं स्थापयित्वा सुप्तः। सन्त्रस्तं पुस्तकम् आत्मवेदनां वर्णयति। मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयित्वा कथां पुनः उत्तरपुस्तिकायां लिखत।** **1/2x10=5**

**एक छात्र रात्रि में सिर के नीचे पुस्तक रखकर सो रहा है। दुःखी पुस्तक अपनी वेदना प्रकट करती है। मञ्जूषा की सहायता से रिक्तस्थानों को भरकर कथा को पुनः उत्तरपुस्तिका में लिखिए।**

**A child is sleeping at night with a book under his head. The aggrieved book expresses its sad story. Complete this story by filling the blanks with appropriate words given in the box. Write it again in your answer book.**

**<u>सन्त्रस्त-पुस्तकस्य आत्मवेदना</u>**

अहं पुस्तकम्। यः एषः ---1----उपरि शिरः प्रस्थाप्य स्वपिति, मम स्वामी। अहं तु अतीव सन्त्रस्तम् स्थाने-स्थाने मम पृष्ठेषु लेखन्या 2-------------कारिताः। मम पृष्ठानाम् अधिकांशाः कोणाः तु परिवर्तनेन 3----------जाताः। नानावर्णैः 4----------मम चित्राणि अस्य द्विवर्षीयभ्रात्रा नष्टीकृतानि। सः माम् 5-----------स्थापयित्वा क्रीडामग्नः भवति। तेन 6-----------मम मुखम् एव कृष्णमसीं 7------------ दूषितम्। मया श्रुतं बालकेषु कृतान् अत्याचारान् अधिकृत्य मानवाधिकारदिवसाः 8-------------। अहं कथयामि 9-------------------अपि आयोजनीयः येन मदीयबन्धु-बान्धवानाम् अपि 10----------------स्यात्।

पद-मञ्जूषा

| |
|---|
| पुस्तकाधिकारदिवसः, भग्नाः, मम, शिशुना, जीवनरक्षा, |
| व्रणाः, इतस्ततः, आयोज्यन्ते, पातयित्वा, अलङ्कृतानि। |

5. **अधः दत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दसहायतया पञ्चवाक्यानि उत्तरपुस्तिकायां लिखत।** 2x5=10

**नीचे दिए गये चित्र को आधार बनाकर मञ्जूषा में दिए गये शब्दों की सहायता से पांच संस्कृत वाक्य लिखिए।**

**Describe the following picture in five sanskrit sentences with the help of words given in the box.**



| |
|---|
| जलागमः, मण्डूकः, जलप्लावः, कुल्याः, शिशवः, आनन्दम्, हरीतिमा, कर्गदनौकाः, केकारवं, हर्षितः, भूमितापः, गगनं, नश्यति। |

**अथवा**

**(or)**

**(केवलं नेत्रहीनेभ्यः)**

**(For blind students only)**

**'विद्यालये दशमकक्षायाः दीक्षान्तसमारोहः' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन पञ्चवाक्येषु अनुच्छेदम् एकं लिखत।** **2x5=10**

**विद्यालय में दसवीं कक्षा के दीक्षान्त समारोह विषय पर मञ्जूषा में दिए गए शब्दों की सहायता से पांच संस्कृत वाक्यों का एक अनुच्छेद लिखिए।**

**Write a passage in five sanskrit sentences on the topic 'Convocation of Tenth Class in School' with the help of words given in the box.**

**शब्द –सूची**

| |
|---|
| अल्पाहारस्य, व्यवस्था, मस्तके, प्रधानाचार्येण, सांस्कृतिककार्यक्रमः, आशीर्वादः, तिलकं, प्राङ्गणे, संस्कृताध्यापकेन, कृतम्, आयोजितः, छात्रेभ्यः |

## खण्डः 'ग'

## खण्ड – ग

## Section - C

**(अनुप्रयुक्त–व्याकरणम्)** **30**

**(Applied Grammar)**

6. **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदेषु सन्धिविच्छेदं सन्धिं वा कृत्वा उत्तरपुस्तिकायां लिखत** **1x3=3**

**निम्नलिखित वाक्यों में स्थूलाक्षर पदों में सन्धि अथवा सन्धिविच्छेद करके उत्तरपुस्तिका में पुनः लिखिए**

**Join or disjoin the bold words given in following sentences. Rewrite the sentences in your answer book.**

(i) **कीटोऽपि** सुमनःसङ्गाद् आरोहति सतां शिरः।

(ii) **मतिमताम्** च विलोक्य दरिद्रतां विधिरहो बलवान् इति मे मतिः।

(iii) यत्करिष्ये **तच्छ्रूयताम्**।

**7.** **अधोलिखितेषु रेखाङ्कितपदेषु समासं विग्रहं वा कृत्वा उत्तरपुस्तिकायां लिखत** **1x4=4**

**निम्नलिखित वाक्यों में रेखांकित पदों में समास अथवा विग्रह करके उत्तरपुस्तिका में लिखिए**

**Join or disjoin compounds in the underlined words of the following sentences. Rewrite the sentences in your answer book.**

मानवजीवनम् चतुर्षु आश्रमेषु विभक्तम्। ब्रह्मचर्याश्रमे शिक्षाया: ग्रहणे स्त्रीणाम् पुरुषाणाम् च समान: अधिकार: आसीत्। गृहस्थाश्रमे जना: यथाशक्ति धनम् अन्नम् च दत्त्वा अन्येषाम् आश्रमवासिनां रक्षां कुर्वन्ति स्म। कोऽपि जन: तत्र अशिक्षित: न आसीत्।

**8.** **कोष्ठे दत्तान् प्रकृतिप्रत्ययान् योजयित्वा अनुच्छेदं पुनः लिखत।** **1x5=5**

**कोष्ठक में दिए गये प्रकृतिप्रत्ययों को जोड़कर अनुच्छेद को पुनः लिखिए।**

**Rewrite the passage by adding suffixes to the given roots and words.**

सर्वेषां मानवानां सेवां (i)--------------(कृ+शानच्) वृक्षा: केषां न (ii)------------(वन्द्+अनीयर्)। (iii)-------------------(छाया+मतुप्) वृक्षा: मार्गे श्रान्तपथिकेभ्य: आश्रयं यच्छन्ति। (iv) -----------(कोकिल+टाप्) च आम्रवृक्षे मधुरस्वरेण गायन्ति। यथा (v) ----------------(फल+इन्) वृक्षा: नमन्ति तथैव गुणिन: जना: अपि नमेयु:।

**9.** **मञ्जूषायां दत्तानि पदानि संयोज्य पञ्च वाक्यानि रचयत** **1x5=5**

**मञ्जूषा में दिए गए पदों को जोड़कर पांच वाक्यों की रचना कीजिए।**

**Frame five sentences with the help of words given in the following table.**

| | | | |
|---|---|---|---|
| अहम् | ह्य:<br>श्व:<br>अधुना<br>यदा कदा<br>पठितुम् | उपवने<br>देवालयम्<br>भोजनम्<br>तरणताले<br>विद्यालयम् | अगच्छम्<br>भ्रमामि<br>तरिष्यामि<br>खादामि<br>गच्छामि |

**10.** **अधोलिखितवार्तालापे रिक्तस्थानानि पूरयित्वा केवलम् उत्तरं लिखत** **1x3=3**

**निम्नलिखित वार्तालाप में रिक्त स्थानों को भरकर केवल उत्तर लिखिए।**

**Complete the dialogue and write answers only in your answer book.**

यथा - आचार्य: - वत्स! किम् त्वम् गीताम् पठसि?

छात्र: - आम् मया गीता पठ्यते।

(I) आचार्य: - किम् भानु: पत्रम् लिखति?

छात्र-आम्----------पत्रम् लिख्यते।

(II) आचार्यः - किम् बालाः क्रीडन्ति ?

छात्रः - आम्, बालैः---------।

(III) आचार्यः - किम् भृत्यः गृहम् गच्छति ?

छात्रः - आम् भृत्येन-----गम्यते।

**11. भवान् ग्रीष्मावकाशे दिल्लीतः प्रयागराजम् गन्तुम् इच्छति, तत्र किं किं रेलयानम् कतिवादने गच्छति इति अधः घटिकां दृष्ट्वा उदाहरणानुसारं प्रस्थानसूचनाः उत्तरपुस्तिकायां लिखत** **1x4=4**

**आप ग्रीष्मावकाश में दिल्ली से प्रयागराज जाना चाहते हैं, वहां कौन सी रेल कितने बजे जाती है यह नीचे घड़ी को देखकर उदाहरणानुसार प्रस्थान की सूचना उत्तर पुस्तिका में पुनः लिखिए**

**You want to go to Prayagraj from Delhi during summer vacation. Consult the time table showing the departure of different trains. See the clock and write their depar-ture time in sanskrit in your answer book.**

**यथा**

| | | | |
|---|---|---|---|
| 6.45 |  | प्रातः | 'पुरी एक्सप्रेस' प्रातः पादोनसप्तवादने। |
| 8.00 |  | प्रातः | (i) 'कालका-मेल' प्रातः-----------वादने। |
| 3.30 |  | अपराह्णे | (ii) 'जनता-एक्सप्रेस' अपराह्णे-------वादने। |
| 9.30 |  | रात्रौ | (iii) 'प्रयागराज-एक्सप्रेस' रात्रौ------वादने। |
| 10.15 |  | रात्रौ | (iv) 'दिल्ली-हावड़ा मेल' रात्रौ-------वादने। |

**12. अधोलिखितवाक्येषु अङ्कानां स्थाने संख्यावाचकविशेषणपदानि विरच्य लिखत** **1/2x4=2**

**निम्नलिखित वाक्यों में अङ्कों के स्थान पर संख्यावाचक विशेषण पद भर कर पुनः लिखिए।**

**Write numerical adjectives in place of numerals in the following sentences.**

एकस्मिन् तडागे (4)------------मत्स्याः आसन् (1) ------------व्याधः तत्र आगतवान् अवदत् च ''श्वः अस्माकं (3) ----------- भगिन्यः आगमिष्यन्ति सर्वान् मत्स्यान् गृहीवा नेष्यन्ति''। एकः वृद्धः मत्स्यः सर्वान् (4)-------------मत्स्यान् अकथयत्- ''नास्ति चिन्ता। श्वः कदापि न आगमिष्यति।''

13. **एकः छात्रः अधोलिखितम् अनुच्छेदं लिखितवान्। तत्र तेन काश्चन अशुद्धयः कृताः। तासां संशोधनं कृत्वा पुनः लिखत।** **1x4=4**

**एक छात्र द्वारा लिखे गये निम्नलिखित अनुच्छेद में कुछ अशुद्धियां हैं। उन्हें शुद्ध करके पुनः लिखिए।**

**A student has committed some errors in the following sanskrit sentences. Correct and re-write them again.**

(i) एकः पथिकः ह्यः नगरम् गच्छति।

(ii) तत्र सः बहूनि भवनम् दृष्ट्वा चकितः जातः।

(iii) तस्य मित्रः अपि तत्र तेन सह गतवान्। सः अवदत्–

(iv) अहो विडम्बना! नगरेषु एकतः धनप्रदर्शनम् अपरतः नग्नाः दरिद्राः क्षुधया पीडिताः च स्थ।

## खण्डः 'घ'

## खण्ड–घ

## Section-D

## (पठित–अवबोधनम्) 35

## (Text books)

14अ **अधोलिखितगद्यांशं पठित्वा प्रदत्तान् प्रश्नान् उत्तरत** **5**

**अधोलिखित गद्यांश को पढ़कर दिये गये प्रश्नों के उत्तर लिखिए**

**Read the following passage and answer the questions given below.**

मम कलनस्य तु आधारः सूर्य एव। सूर्यस्य द्वे गती उत्तरायणम् दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मासाः। भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति। चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति अतः तस्य मासस्य नाम चैत्रः भवति।

संवत्सरस्य तु विषये इदमुच्यते–

षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः।

यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः।।

**i. एकपदेन उत्तरत** **1/2x2=1**

**एक पद में उत्तर लिखिए**

**Answer in one-word only**

(i) कस्य द्वे गती स्तः ?

(ii) कस्मिन् मासे पूर्णिमा चित्रानक्षत्रयुता भवति?

**ii. एकवाक्येन उत्तरत** **1x2=2**

**पूर्णवाक्य में उत्तर लिखिए**

**Answer in a complete sentence.**

(i) भारतीयमासानां नामानि कैः सम्बद्धानि ?

(ii) कालचक्रस्य कति अराणि सन्ति ?

**iii.** **निर्देशानुसारम् उत्तरत**

**निर्देशानुसार उत्तर दीजिए**

**Do as directed.** 1

(i) 'वर्ष इत्यर्थे अत्र कः शब्द प्रयुक्तः? 1

(ii) 'पूर्णिमा' इत्यस्य किं विशेषणम् अत्र प्रयुक्तम् ?

**14आ अधोलिखितं पद्यं पठित्वा प्रदत्तान् प्रश्नान् उत्तरत**

**अधोलिखित पद्य को पढ़कर दिये गये प्रश्नों के उत्तर लिखिए**

**Read the following shloka and answer the questions given below.**

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।

व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।।

**I.** **एकपदेन उत्तरत** 1/2x2=1

**एक पद में उत्तर लिखिए**

**Answer in one-word only**

i सरस्वत्याः कोशः कीदृशः वर्तते ?

ii विद्या कथं क्षयम् आयाति ?

**II.** **पूर्णवाक्येन उत्तरत** 1

**पूर्ण वाक्य में उत्तर लिखिए**

**Answer in a complete sentence.**

भारत्याः कोशः कथं वर्धते ?

**III.** **निर्देशानुसारम् उत्तरत**

**निर्देशानुसार उत्तर दीजिए**

**Do as directed**

(i) अस्मिन् श्लोके सम्बोधनपदं किमस्ति ? 1

(ii) 'अपूर्वः' इति विशेषणपदं कस्मै प्रयुक्तम् ? 1

(iii) 'व्ययतः' इति पदस्य विपरीतभावात्मकं शब्दं चित्वा लिखत। 1

**14इ अधोलिखितनाट्यांशं पठित्वा प्रश्नान् उत्तरत** 5

**अधोलिखित नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए**

**Read the extract from the play and answer the questions given below.**

युधिष्ठिरः – सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति।

श्रीकृष्णः – तर्हि न जानसि तस्य मनोवृत्तिम्। पितुः उपदेशेन असन्तुष्टः सः (अश्वत्थामा) एकदां द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रं दत्त्वा स सुदर्शनचक्रम् अवाञ्छत्।

युधिष्ठिरः – (साश्चर्यम्) कथं चक्रम् इति।

श्रीकृष्णः - आम्। मया कथितम्। नाहं त्वत् (द्रौणेः) ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां शक्तिं धनुः, चक्रं वा इच्छसि तुभ्यं ददामि।

युधिष्ठिरः - ततस्ततः

श्रीकृष्णः - स तु चक्रम् एव अयाचत। गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रं गृहीतवान् किन्तु सः चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत्।

युधिष्ठिरः - जानीमः भवतः दिव्यां शक्तिम्।

**I. एकपदेन उत्तरत** 1/2x4=2

**एक पद में उत्तर लिखिए**

**Answer in one-word only**

(i) पितुः उपदेशेन असन्तुष्टः कः द्वारकापुरीम् अगच्छत् ?

(ii) ब्रह्मास्त्रं दत्त्वा अश्वत्थामा श्रीकृष्णं किम् अयाचत ?

(iii) श्रीकृष्णः कस्मात् ब्रह्मास्त्रं न इच्छति स्म ?

(iv) अश्वत्थामा कस्य चक्रं गृहीत्वा अपि चालयितुं शक्तः नाभवत् ?

**II. पूर्णवाक्येन उत्तरत** 1x1=1

**पूर्णवाक्य में उत्तर लिखिए**

**Answer in a complete sentence.**

चक्रं गृहीत्वा अपि अश्वत्थामा किं कर्तुं समर्थः न अभवत् ?

**III. यथानिर्देशम् उत्तरत** 1/2x4=2

**निर्देशानुसार उत्तर दीजिए**

**Do as directed.**

(i) 'वामेन' इति पदस्य समानार्थकपदं लिखत।

(ii) 'त्वत्' इति पदं कस्मै प्रयुक्तम् ?

(iii) ''आश्चर्येण सहितम्'' इत्यस्य स्थाने किं पदं संवादे प्रयुक्तम् ?

(iv) '' खिन्नं द्रौणिम्'' अनयोः पदयोः किं विशेषणपदम् ?

**15. निम्नलिखितकथनयोः भावम् उपयुक्तशब्दैः पूरयित्वा पुनः लिखत** 6

**निम्नलिखित कथनों के भाव को उपयुक्त शब्दों से पूरा करके फिर से लिखिए**

**Complete the following explanations with appropriate words. Rewrite them in your answer book.**

**I. ''कोऽन्धः ? योऽकार्यरतः, को बधिरः ? यो हितानि नशृणोति''** 1x3=3

**भावः–** अस्मिन् संसारे स एव (1)-------यः उचितानुचितं जानन् अपि अकरणीयं कृत्यं करोति। सः च (2)--------कथ्यते। यः हितकारि वचनं न (3) -------------।

**II. पिताऽस्य किं तपस्तेपे इत्युक्तिः तत्कृतज्ञता।** 1x3=3

भावः– बाल्यावस्थायां स्वपुत्राय विद्याधनं दातुं पिता अति कष्टं सहमानः सर्वविधं तपः कृत्वा अपि सः स्वसन्ततिं शिक्षयितुं यतेत। यदि पुत्रः एतन्मात्रम् एव स्मरेत् यत् पिता तस्मै पुत्राय महत् (1)--------अकरोत् इयम् (2)--------- तस्य पुत्रस्य (3)-------------प्रकटयति।

**16. अधोलिखितश्लोकयोः अन्वयम् पूरयित्वा लिखत** 1½x1½=3

**निम्नलिखित श्लोकों का अन्वय पूरा करके लिखिए।**

**Complete the prose order reordering of both the shlokas and rewrite them in the answer sheet.**

I. यः सप्तराज्येषु विभासमानः
तरंगिणी यत्र च लोहिताख्या।
'ईटा' हि यस्यास्ति पुरी प्रधाना
सुस्वागतं भो! अरूणाचलेऽस्मिन्।।

**अन्वयः–** ½x3=1½

यः सप्तराज्येषु--------,यत्र च लोहिताख्या तरंगिणी, यस्य प्रधाना पुरी-----------हि अस्ति। भो! अस्मिन् ---------सुस्वागतम् (अस्तु)।

II. तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।

**अन्वयः–** ½x3=1½

भरतर्षभ! तस्मात् त्वम्-------इन्द्रियाणि नियम्य-------------एनम् पाप्मानम् हि-----------।

**17. उदाहरणानुसारं रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं क्रियताम्।** 1x4=4

**उदाहरण के अनुसार रेखाङ्कित पद के आधार पर प्रश्ननिर्माण कीजिए।**

**Frame questions on the basis of words underlined in the following sentences.**

यथा <u>मनसः</u> निग्रहः वायोः इव कठिनः।

प्रश्नः <u>कस्य</u> निग्रहः वायोः इव कठिनः?

(i) अहम् प्रकृतिः एव <u>युष्माकं</u> जननी।

(ii) पिता <u>पुत्राय</u> बाल्ये विद्याधनं यच्छति।

(iii) सूर्योदये <u>तमः</u> नश्यति।

(iv) त्यागी <u>सर्वव्यसनविनाशे</u> दक्षः।

**18. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत।** 4

**अधोलिखित वाक्यों को घटनाक्रमानुसार फिर से लिखिए।**

**Rewrite the following sentences as per sequential order.**

1. एकदा शक्रः नेत्रहीनयाचकस्य रूपे राज्ञः समीपम् आगच्छत्।
2. विषण्णाः अमात्याः अवदन्–महाराज! अलम् एतावता दुस्साहसेन।
3. वैद्योक्तविधिना राजा एकं चक्षुः उत्पाट्य प्रीत्या याचकाय समर्पितवान्।
4. अथ भगवान् बोधिसत्त्वः शिवीनाम् राजा बभूव।
5. याचकः उवाच–त्वत्तः चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।

6. जनकल्याणकर्मसु रतो राजा पुत्रवत् प्रजाः पालयति स्म।

7. भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।

8. नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।

**19. अधोलिखितासु पंक्तिषु स्थूलाक्षरपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा पुनः लिखत।** **3**

**निम्नलिखित पंक्तियों में स्थूलाक्षर पदों के प्रसङ्गानुसार शुद्ध अर्थ चुनकर फिर लिखिए।**

**Select and write the appropriate meanings of the bold words as per reference to their context.**

यथा **शुश्रूषा** श्रवणं चैव ग्रहणं-धारणं तथा।

(i) सेवा (ii) श्वश्रुः (iii) **श्रोतुम् इच्छा**

I. अहर्निशं **महानसं** प्रविश्य यत् पश्यति तद् भक्षयति।

(i) प्रासादम् (ii) महत् आसनम् (iii) पाकशालाम्

II. आपदां **तरणिः** धैर्यम्

(i) नौका (ii) सूर्यः (iii) तरणतालः

III. मम **केकारवं** श्रुत्वा कोकिलः अपि लज्जते।

(i) काकस्य रवम् (ii) मयूरस्य ध्वनिम् (iii) कुक्कुटस्य शब्दम्।

## आदर्शसंस्कृतप्रश्नपत्रम्-1

## अङ्कयोजना -1

### विषयः संस्कृतम् (सम्प्रेषण - आधारितम्)

**कक्षा दशमी** | **कोड संख्या- 122**

**अवधिः होरात्रयम्** | **पूर्णाङ्काः- 100**

### खण्डः 'क'

### (अपठित-अवबोधनम्)

अस्मिन् खण्डे अनुच्छेदद्वयम् अस्ति [5+10]

प्रथमः अनुच्छेदः 40-50 शब्दपरिमितः [5]

प्रश्नाः-

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अंक-संकेतः | अंक-विभागः |
|---|---|---|---|---|---|
| I. | तथ्य-बोध-परीक्षणम् | अतिलघूत्तरः एकपदेन उत्तरम् | | | |
| | | | (i) काकम् | ½ | |
| | | | (ii) शृगालः | ½ | |
| | | | (iii) रोटिकाखण्डम् | ½ | |
| | | | (iv) वृक्षे | ½ | 2 |
| II. | तथ्य-बोध-परीक्षणम् | लघूत्तरः पूर्णवाक्येन उत्तरम् | काकः रोटिकाखण्डं पादयोः अधः अस्थापयत् | 1+1 | |
| | | | (एकः अङ्कःशुद्धतथ्य- परीक्षणाय, एकः अङ्कः च शुद्धवर्तनीकृते) | | 2 |
| (III) | भाषिकतत्त्व-प्रयोग-परीक्षणम् | (i) विशेषणचयनम् | (i) पूर्ववत् | ½ | |
| | | (ii) कः कम् कथयति? | (ii) गताः ते दिवसाः इति काकःशृगालम् अकथयत्। | ½ | 1 |

[5]

**2 द्वितीयः अनुच्छेदः 80–100 शब्दपरिमितः।**

**प्रश्नाः**

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अंक-संकेतः | अंक-विभागः |
|---|---|---|---|---|---|
| I. | तथ्य-बोध-परीक्षणम् | अतिलघूत्तरः एकपदेन | | | |
| | | | (i) स्फोटकानाम् | ½ | |
| | | | (ii) शरदि | ½ | |
| | | | (iii) वृक्षाः | ½ | |
| | | | (iv) सुखमयम् | ½ | 2 |
| II. | तथ्य-बोध-परीक्षणम् | लघूत्तरः पूर्णवाक्येन | (i) मा कश्चिद् दुःखभाग् भवेत् इति अस्माकम् आदर्शः। | 2 | |
| | | | (ii) स्फोटकानां धूमः रुग्णान् पीडयति | 2 | 4 |
| III. | भाषिकतत्त्व-प्रयोगपरीक्षणम् | अतिलघूत्तरः एकपदेन | | | |
| | | (i) विलोमपदप्रयोगः | (i) क्षीणा | ½ | |
| | | (ii) अव्ययपदचयनम् | (ii) सर्वत्र | ½ | |
| | | (iii) विशेषणचयनम् | (iii) प्राचीनतमम् | ½ | |
| | | (iiv) विलोमचयनम् | (iiv) हानिकरः | ½ | 2 |
| IV. | शीर्षकप्रदानम् | अतिलघूत्तरः | (i) दीपावल्याः पर्यावरणे प्रभावः<br>(ii) अति सर्वत्र वर्जयेत्।<br>(iii) वयं दीपावलिं कथं मानयेम (अथवा-अन्यत् किमपि उपयुक्तम् शीर्षकम्) | | 2 |
| | | | | | 10 |

## खण्डः 'ख'

## (रचनात्मकलेखनम्)

5+5+10/10=20

**अस्मिन् खण्डे त्रयः प्रश्नाः सन्ति। प्रथमप्रश्ने लिखिते पत्रे मञ्जूषातः चित्वा विभिन्नरिक्तस्थानानां पूर्तिं कृत्वा पत्रं पुनः लेखनीयम्। दशरिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्त्तिकृते अर्धः (½) अंकः निर्धारितः।**

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अङ्क-संकेतः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 3. | पत्रलेखने औपचारिककार्य-परीक्षणम् | यस्मात् नगरात् पत्रं प्रेषितं तस्य नाम। | 1. कालिकातातः | ½ | |
| | | सम्बोधनपदम् | 2. पितृमहाभागाः | ½ | |
| | | पत्रप्रेषकस्य पत्रप्राप्तिकर्त्रा सह सम्बन्धः। | 9. प्रियपुत्रः | ½ | |
| | | पत्रसङ्केते यत्र पत्रं प्रेष्यते तस्य स्थानस्य नाम | 10. चेन्नईनगरम् | ½ | 2 |
| | पत्रलेखने विषयवस्तु-बोधपरीक्षणम् | सन्दर्भानुकूल-विषयवस्तुज्ञानम् (रिक्तस्थानपूर्तिः) | 3. निवेदयामि | ½ | |
| | | | 4. उत्तरपत्राणि | ½ | |
| | | | 5. शरदवकाशे | ½ | |
| | | | 6. शैक्षिकयात्रायाः | ½ | |
| | | | 7. पञ्चशतम् | ½ | |
| | | | 8. जनन्यै | ½ | 3 |
| | | | | | 5 |

4. **अस्मिन् प्रश्ने प्रदत्ते अनुच्छेदे सन्दर्भानुकूलरिक्तस्थानपूर्त्तिः अपेक्षिता। अत्र दशरिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्त्तिकृते अर्धः (½) अंकः निर्धारितः। उत्तरसङ्केताः मञ्जूषातः एव ग्रहीतव्याः।**

| | | | | |
|---|---|---|---|---|
| अनुच्छेदे सन्दर्भानुकूल-शब्दप्रयोगपरीक्षणम् | रिक्तस्थानपूर्त्तिः | 1. मम | ½ | |
| | | 2. व्रणाः | ½ | |
| | | 3. भग्नाः | ½ | |
| | | 4. अलङ्कृतानि | ½ | 2½ |
| | | 5. इतस्ततः | ½ | |

| | | |
|---|---|---|
| 6. शिशुना | ½ | |
| 7. पातयित्वा | ½ | |
| 8. आयोज्यन्ते | ½ | |
| 9. पुस्तकाधिकारदिवस: | ½ | |
| 10. जीवनरक्षा | ½ | 2½ |
| | | 5 |

**5. एष: प्रश्न: चित्रवर्णनसम्बद्ध:। अस्मिन् प्रश्ने चित्रं दृष्ट्वा मञ्जूषायाम् प्रदत्तशब्दसूचीसहायतया पञ्चवाक्येषु वर्णनम् अपेक्षितम्। प्रतिवाक्यम् अङ्कद्वयं निर्धारितम्।**

| | | | |
|---|---|---|---|
| अवबोधपूर्वकं | चित्रवर्णनार्थम् | छात्रा:स्वतन्त्ररूपेण | पञ्चवाक्यानि |
| वाक्यसंरचना- | वाक्यनिर्माणम् | मञ्जूषात: शब्दान्, | 1+1 |
| प्रयोगपरीक्षणम् | | चित्वा वाक्यनिर्माणं | 1+1 |
| | | करिष्यन्ति। | 1+1 |
| | | (प्रतिवाक्यम् एक: अंक:) | 1+1 |
| | | शुद्धतथ्यार्थम्, एक अंक: | 1+1 |
| | | च भाषाप्रयोगाय | |
| | | | 10 |

## (अथवा केवलं नेत्रहीनेभ्य:)

**प्रदत्तसङ्केतान् आश्रित्य " विद्यालये दशमकक्षाया: दीक्षान्त-समारोह:" इति विषयम् आधृत्य स्वानुभवाधारेण पञ्चवाक्येषु अनुच्छेदस्य लेखनम् अपेक्षितम्। (प्रतिवाक्यम् अङ्कद्वयम् निर्धारितम् एक: अंङ्क: शुद्धतथ्यकृते एक: च शुद्धभाषाप्रयोगाय।)**

| | | | |
|---|---|---|---|
| अवबोधपूर्वकम् | वाक्यनिर्माणम् | छात्रा: शब्दान् प्रयुज्य | 1+1 |
| वाक्यसंरचना- | | पञ्चवाक्यानि | 1+1 |
| प्रयोगपरीक्षणम् | | लेखिष्यन्ति | 1+1 |
| | | | 1+1 |
| | | | 1+1 |
| | | | 10 |
| | | | 20 |

## खण्डः 'ग'

### (अनुप्रयुक्तव्याकरणम्)

30

**अस्मिन् खण्डे भाषायाः व्यावहारिकप्रयोगः अपेक्षितः।**

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अङ्क-संकेतः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 6. | वाक्येषु सन्धिः/ सन्धिच्छेद-परीक्षणम् | अनुप्रयोगात्मकः रिक्तस्थानपूर्त्तिमाध्यमेन सन्धिकरणम् सन्धिच्छेदः वा बोधपरकःअति लघूत्तरः | (i) कीटः+अपि | 1 | |
| | | | (ii) मतिमताञ्च | 1 | |
| | | | (iii) तत्+श्रूयताम् | 1 | |
| | | | | | 3 |
| 7. | वाक्येषु समस्तपदानां विग्रहः असमस्तपदानां समसनम्-इति दक्षतापरीक्षणम् | वाक्ये स्थूलपदानां विग्रहः स्थूलपदानां समसनम् | (i) मानवस्य जीवनम् | 1 | |
| | | | (ii) समानाधिकारः | 1 | |
| | | | (iii) शक्तिम् अनतिक्रम्य | 1 | |
| | | | (iv) न शिक्षितः | 1 | 4 |
| 8. | वाक्ये कृदन्तपदानां प्रयोगपरीक्षणम् | प्रकृति-प्रत्ययौ योजयित्वा वाक्यसन्दर्भानुसारं रिक्तस्थानपूर्त्तिः | (i) कुर्वाणाः | ½+½ | |
| | | | (ii) वन्दनीयाः | ½+½ | |
| | | | (iii) छायावन्तः | ½+½ | |
| | | | (iv) कोकिलाः | ½+½ | |
| | | | (v) फलिनः | ½+½ | |
| | | | (अर्धाङ्कः च शुद्धविभक्ति-वचनप्रयोगार्थं निर्धारितः) | | 5 |
| 9. | वाक्येषु अव्यय-पद-प्रयोगपरीक्षणम् | तालिकायां दत्तैः-अव्ययपदैःवाक्यप्रयोगः | (i) अहम् ह्यः देवालयम् अगच्छम् | 1 | |
| | | | (ii) अहम् श्वः तरणताले तरिष्यामि। | 1 | |
| | | | (iii) अहम् अधुना भोजनं खादामि। | 1 | |
| | | | (vi) अहम् यदा कदा उपवने भ्रमामि। | 1 | |
| | | | (v) अहम् पठितुं विद्यालयं गच्छामि | 1 | 5 |

| | | | | | |
|---|---|---|---|---|---|
| **10.** | वार्तालापे कर्मवाच्यप्रयोग-परीक्षणम् | रिक्तस्थानेषु अपेक्षित-कर्त्रा, कर्मपदेन, क्रियापदेन च पूर्तिः | (i) भानुना | 1 | |
| | | | (ii) क्रीड्यते | 1 | |
| | | | (iii) गृहम् | 1 | |
| | | | | | 3 |
| **11.** | घटिकां दृष्ट्वा संस्कृतेन समय-ज्ञानपरीक्षणम् | वाक्ये रिक्तस्थानपूर्ति-माध्यमेन समयलेखनम् | (i) अष्टवादने | 1 | |
| | | | (ii) सार्धत्रिवादने | 1 | |
| | | | (iii) सार्धनववादने | 1 | |
| | | | (iv) सपाददशवादने | 1 | |
| | | | | | 4 |
| **12.** | संख्यावाचकपद-प्रयोगपरीक्षणम् | अङ्कानाम् स्थाने वाक्येषु संस्कृतपदैः रिक्तस्थानपूर्त्तिः | (i) चत्वारः | | |
| | | | (ii) एकः | | |
| | | | (iii) तिस्रः | | |
| | | | (iv) चतुरः | | |
| | | | | | 2 |
| **13.** | वाक्य-संरचनायाम् शुद्धलिङ्गवचन-क्रियापदप्रयोग-परीक्षणम् | लिखितेषु वाक्येषु स्थूलाक्षरपदानाम् अशुद्धिसंशोधनम् | (i) अगच्छत् | 1 | |
| | | | (ii) भवनानि | 1 | |
| | | | (iii) मित्रम् | 1 | |
| | | | (iv) सन्ति | 1 | |
| | | | | | 4 |
| | | | | | 30 |

## खण्डः 'घ'

### (पठितावबोधनम्)

35

**अस्मिन् खण्डे सर्वे प्रश्नाः पाठ्यपुस्तकम् (मण्किा भागः II) संशोधितसंस्करणम् आधारिताः।**

| क्रमांकः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अङ्क-संकेतः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 14 अ | पठित-गद्यांश-बोध-परीक्षणम् | (I) अतिलघूत्तरः एकपदेन उत्तरम् | (i) सूर्यस्य | ½ | |
| | | | (ii) चैत्रे | ½ | 1 |
| | | (II) लघूत्तरः पूर्णवाक्येन उत्तरम् | (II) (i) भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि | 1 | |
| | | | (ii) षष्ट्युत्तरत्रिशतानि दिनानि एव अराणि | 1 | 2 |
| | भाषिकतत्त्व-प्रयोग-परीक्षणम् | (i) पर्यायवाचिशब्द-चयनम् | (i) वर्ष इत्यर्थे अत्र सवंत्सरः इति शब्दः प्रयुक्तः | 1 | |
| | | (ii) विशेषणपदचयनम् | (ii) चित्रानक्षत्रयुता इति विशेषणमत्र प्रयुक्तम् | 1 | 2 |
| | | | | | 5 |
| 14 आ | पठित-पद्य-बोध-परीक्षणम् | I. अतिलघूत्तरः एकपदेन उत्तरम् | (i) अपूर्वः | ½ | |
| | | | (ii) सञ्चयात् | ½ | 1 |
| | | II. लघूत्तरः पूर्णवाक्येन उत्तरम् | भारत्याः कोशः व्ययतः वर्धते। | 1 | 1 |
| | भाषिकतत्त्व-प्रयोग-परीक्षणम् | III.(i) सम्बोधनपदचयनम् | (i) भारति | 1 | |
| | | (ii) विशेषणपद-चयनम् | (ii) कोषाय | 1 | |
| | | (iii) विलोमपद-चयनम् | (iii) सञ्चयात् | 1 | 3 |
| | | | | | 5 |
| 14 इ | पठित-नाट्यांश-बोध-परीक्षणम् | I. अतिलघूत्तरः एकपदेन उत्तरम् | (i) अश्वत्थामा | ½ | |
| | | | (ii) सुदर्शनचक्रम् | ½ | |
| | | (ii) लघूत्तरः | (iii) द्रौणिनः | ½ | |
| | | | (iv) श्रीकृष्णस्य | ½ | 2 |
| | | पूर्णवाक्येन उत्तरम् | I. चक्रं गृहीत्वा अपि सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत् | 1 | 1 |

| | | | | | |
|---|---|---|---|---|---|
| | भाषिकतत्त्वप्रयोग-परीक्षणम् | (i) पर्यायपदचयनम् | (i) सव्येन | ½ | |
| | | (ii) सर्वनामस्थाने संज्ञा-प्रयोगः | (ii) द्रौणिने | ½ | |
| | | (iii) समस्तपदचयनम् | (iii) साश्चर्यम् | ½ | |
| | | (iv) विशेषण-पदचयनम् | (iv) खिन्नम् | ½ | 2 |
| | | | | | 5 |
| **15.** | भावार्थबोध-परीक्षणम् | (i) प्रदत्तेषु भावार्थेषु रिक्तस्थानपूर्तिः | (i) अन्धः | 1 | |
| | | | (ii) बधिरः | 1 | 3 |
| | | | (iii) शृणोति | 1 | |
| | | (ii) प्रदत्तेषु भावार्थेषु रिक्तस्थानपूर्तिः | (i) तपः | 1 | |
| | | | (ii) उक्तिः | 1 | 3 |
| | | | (iii) कृतज्ञताम् | 1 | |
| | | | | | 6 |
| **16.** | पद्य-अन्वय-परीक्षणम् | (i) प्रदत्ते अन्वये श्लोकं पठित्वा रिक्तस्थान-पूर्तिः | (i) विभासमानः | ½ | |
| | | | (ii) ईटा | ½ | 1½ |
| | | | (iii) अरुणाचले | ½ | |
| | | (ii) प्रदत्ते अन्वये श्लोकं पठित्वा रिक्तस्थान-पूर्तिः | (i) आदौ | ½ | |
| | | | (ii) ज्ञानविज्ञाननाशनम् | ½ | 1½ |
| | | | (iii) प्रजहि | ½ | |
| | | | | | 3 |
| **17.** | प्रश्ननिर्माणकौशल-परीक्षणम् | प्रदत्तकथनेषु स्थूल-पदानि आधृत्य प्रश्ननिर्माणम् | (i) केषाम् | ½+½ | |
| | | | (ii) कस्मै | ½+½ | |
| | | | (iii) किम् | ½+½ | |
| | | | (iv) कस्मिन् | ½+½ | |
| | | | | | 4 |
| | | | अर्धाङ्कः शुद्धप्रश्नवाचक-सर्वनामकृते, अर्धाङ्कः च वर्तनीकृते | | |
| **18.** | तर्कपूर्णघटनाक्रम-संयोजनपरीक्षा | प्रदत्तघटनानाम् क्रमनिर्धारणम् | 4,6,1,5,7,8,2 3 | ½X8=4 | 4 |
| **19.** | प्रसङ्गानुसारं शब्दार्थबोधपरीक्षणम् | प्रदत्तविकल्पेभ्यः शुद्ध-अर्थ-चयनम् | यथा I. पाकशालाम् | | |
| | | | I. (iii) श्रोतुम् इच्छा | 1 | |
| | | | II. (i) नौका | 6 | |
| | | | III. (ii) मयूरस्य ध्वनिम् | 7 | 3 |
| | | | | | 35 |

# आदर्शसंस्कृतप्रश्नपत्रम् 1
## पाठ्यक्रमपरिशीलनम्
## (Coverage of Syllabus)

**कक्षा दशमी** | **पाठ्यपुस्तकम् मणिका भागः II**

**खण्डः 'क' (अपठित-अवबोधनम्)** | 5+10=5

**I. अपठित-अनुच्छेदः 48 शब्दपरिमितः**

| क्रमांकः | प्रश्नसंख्या | विषयः | | अंकः |
|---|---|---|---|---|
| 1. | I | एकपदेन उत्तरम् | ½ x 4= | 2 |
| | II | पूर्णवाक्येन उत्तरम् | 2 x1 = | 2 |
| | III | (भाषिककार्यम्) भाषिकतत्त्वपरीक्षणम् | ½ x 2= | 1 |
| | | | | 5 |
| 2. | द्वितीयः अपठितः अनुच्छेदः - 95 शब्दपरिमितः | | | |
| | | एकपदेन उत्तरम् | ½ x 4= | 2 |
| | | पूर्णवाक्येन उत्तरम् | 2 x 2 = | 4 |
| | | भाषिकतत्त्वपरीक्षणम् | ½ x 4= | 2 |
| | | विलोमपदचयनम् | | |
| | | अव्ययपदचयनम् | | |
| | | विशेषणचयनम् | | |
| | | विलोमपदचयनम् | | |
| | | शीर्षकप्रदानम् | 2 x 1 = | 2 |
| | | | | 10 |

**खण्डः 'ख' रचनात्मकं कार्यम्**

| | | | |
|---|---|---|---|
| 3. | पत्रलेखनम् (अनौपचारिकपत्रम्)<br>शैक्षिकयात्रायै धनप्रेषणार्थं पितरं प्रति पुत्रेण लिखितं पत्रम्<br>(रिक्तस्थानपूर्तिमाध्यमेन) | | |
| | औपचारिककार्यपरीक्षणम् | ½ x 4= | 2 |
| | बोधपरीक्षणम् | ½ x 6= | 3 |
| | | | 5 |
| 4. | अनुच्छेदे रिक्तस्थानपूर्तिः- अनुच्छेदे सन्दर्भानुकूलं<br>शब्दप्रयोगपरीक्षणम् प्रतिशुद्धपूर्तिकृते अर्धः अङ्कः | ½x10= | 5 |

| | | | |
|---|---|---|---|
| **5.** | चित्रवर्णनम्, प्रदत्तसूचीसाहाय्येन पञ्चवाक्यानि<br>लेखितव्यानि<br>अथवा<br>(केवलं नेत्रहीनेभ्य:)<br>विद्यालये दशमकक्षाया: दीक्षान्तसमारोह: इति विषयम्<br>अधिकृत्य प्रदत्तसंकेतान् आश्रित्य पञ्चवाक्येषु अनुच्छेद-लेखनम् | | 10 |

**खण्ड: 'ग' अनुप्रयुक्तव्याकरणम् 30**

| | | | |
|---|---|---|---|
| **6.** | सन्धिविच्छेद: सन्धिज्ञानम्<br>सन्धिविच्छेदज्ञानं सन्धिज्ञानपरीक्षणम्<br>विसर्गसन्धि: उत्वम्<br>व्यञ्जनसन्धि: मोऽनुस्वार:<br>व्यञ्जनसन्धि: त् स्थाने च्<br>श् स्थाने छ् | 1x3= | 3 |
| **7.** | अनुच्छेदे समस्तपदम्/समासविग्रह:<br>अनुप्रयोगात्मक:<br>(i) षष्ठीतत्पुरुष:<br>(ii) कर्मधारय:<br>(iii) अव्ययीभाव:<br>(iv) नञ् तत्पुरुष: | 1x4= | 4 |
| **8.** | अनुप्रयोगात्मकरूपेण प्रकृति-प्रत्यय-प्रयोग-परीक्षणम्<br>(i) शानच् (ii) अनीयर् (iii) वतुप्<br>(iv) टाप् (v) इन् | 1x5= | 5 |
| **9.** | प्रदत्तशब्दसूचीसाहाय्येन वाक्यरचना | 1x5= | 5 |
| **10.** | संवादे उचितपदै: पूर्ति: (कर्मवाच्यप्रयोग:)<br>भानुना, तृतीयान्तकर्ता<br>क्रीड्यते, क्रिया, भाव-अनुसारम्<br>गृहम्, प्रथमान्तं कर्म | 1x3= | 3 |

| | | | |
|---|---|---|---|
| 11. | घटिकां दृष्ट्वा समयज्ञानपरीक्षणम् | | |
| | | 1x4= | 4 |
| 12. | अनुच्छेदे रिक्तस्थानपूर्तिमाध्यमेन संख्यापरीक्षणम्<br>(i) चत्वारः (ii) एकः (iii) तिस्रः (iv) चतुरः | 1/2X4= | 2 |
| 13. | पुरूष-वचन-लिङ्ग-लकारविभक्तिदृष्ट्या अशुद्धशब्दानां शोधनम् | | |

| | | | |
|---|---|---|---|
| (i) कालविषयिका | (i) ह्यः - अगच्छत् | | |
| (ii) विशेषण-विशेष्य-अशुद्धिः | (ii) बहूनि - भवनानि | | |
| (iii) लिङ्ग - विषयक - अशुद्धिः | (iii) मित्रः - मित्रम् | | |
| (iv) कर्तृ-क्रिया-अन्वितिः | (iv) दरिद्राः - सन्ति | 1X4= | 4 |

| प्रश्न संख्या | खण्डः 'घ' पठित-अवबोधनम् | अङ्का | 35 |
|---|---|---|---|
| 14. | विषयः | पाठ-संख्या | |
| | अ गद्यांशः **कालोऽहम्** | | |
| | मम कलनस्य.......सः परः कविः | 11 | 5 |
| | आ पद्यांशः **वाङ्मयं** तपः | 1 | |
| | अपूर्वःकोऽपि - संचयात्। | | 5 |
| | इ नाट्यांशः - **राष्ट्रं संरक्ष्यमेव हि** | 9 | |
| | युधिष्ठिरः - सम्प्रति आश्वस्तः | | |
| | दिव्यशक्तिम् | | 5 |
| 15. | भावबोधनम् - **किम् किम् उपादेयम्** | 3 | |
| | (i) कोऽन्धः - न शृणोति | | |
| | (ii) **तिरुक्कुरलसूक्तिसौरभम्** | 8 | |
| | पिताऽस्य किम् - तत्कृतज्ञता | | 6 |
| 16. | अन्वये रिक्तस्थानपूर्तिः | | 1½+1½ |
| | **भो सुस्वागतं अरुणाचलेऽस्मिन्** | | **3** |
| | यः सप्तराज्येषु ........ किम् | 10 | |
| | **अभ्यासवशगं मनः** तस्मात्त्वमिन्द्रियाण्यादौ | | |
| | ज्ञानविज्ञाननाशनम् | 5 | 3 |

| | | | |
|---|---|---|---|
| **17.** | **प्रश्ननिर्माणम्** | | |
| | **रमणीया हि सृष्टिरेषा** | 7 | |
| | **तिरुक्कुरल-सूक्ति-सौरभम्** | 8 | |
| | **आज्ञा गुरूणां ह्यविचारणीया** | 2 | |
| | **किम् किम् उपादेयम्** | 3 | 4 |
| **18.** | **घटनाक्रमसंयोजनम्** | | |
| | **नास्ति त्यागसमं सुखम्** | 4 | 4 |
| **19.** | **शुद्ध-अर्थ-चयनम्** | | |
| | यथा शुश्रूषा-**वाङ्मयं तपः** | | |
| | I. महानसम् | 2 | |
| | II. तरणिः | 6 | |
| | III. केकारवम् | 7 | 3 |

35

## आदर्शप्रश्नपत्रम् 2
## संस्कृतम्
### दशमी-कक्षा

**अवधिः होरात्रयम्** **पूर्णाङ्काः 100**
**समय - तीन घण्टे** **पूर्णांङ्क 100**
**Time - 3 hours** **Total marks : 100**

Section A: Reading Comprehension
खण्डः 'क' अपठितांश-अवबोधनम् 15 अङ्काः
Section B: Writing skills
खण्डः 'ख' रचनात्मक-कार्यम् 20 अङ्काः
Section C: Applied Grammar
खण्डः 'ग' अनुप्रयुक्तव्याकरणम् 30 अङ्काः
Section D: Text books
खण्डः 'घ' पठित-अवबोधनम् 35 अङ्काः

**निर्देशाः**
**Instructions**

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
   इस प्रश्नपत्र के चार खण्ड हैं।
   The answers paper has four sections.

2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
   प्रत्येक खण्ड के उत्तर पृथक् दी गई उत्तरपुस्तिका में लिखने होंगे।
   The questions have to be written in a separate answer sheet.

3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
   प्रत्येक खण्ड के उत्तर एक ही स्थान पर क्रम से लिखें।
   The answer to each section must be written at one place.

4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
   प्रश्नपत्र में उत्तर न लिखें।
   Don't write answers on the Question paper.

5. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
   प्रश्नसंख्या प्रश्नपत्र के अनुसार अवश्य ही लिखनी होगी।
   Please write Question number according to Question paper.

# आदर्शप्रशनपत्रम् 2
# आदर्श प्रश्न–पत्र–2
# Section - A
# संस्कृतम्

**समयः होरात्रयम्** **पूर्णाङ्काः 100**

**Time: 3 hours** **कक्षा–दशमी** **Total marks: 100**

**Section - A**

**खण्डः 'क'**

**(अपठित–अवबोधनम्)** 5+10

**(Reading Comprehension)**

1. **अधोलिखित–अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत**
**निम्नलिखित अनुच्छेद को पढ़कर दिये गये प्रश्नों के उत्तर उत्तरपुस्तिका में लिखिए**
**Read the following passage and answer the questions in the given answer sheet in sanskrit.**

